# Charaka Samhita Adhyaya 8 Jaatisutriya Adhyayay

Prepared by
Dr. Shrikant Verma
Assistant Proffessor
(Samhita evam Siddhanta)

# Couse of comlexions of body

- न खलु केवलमेतदेव कर्म वर्णवैशेष्यकरं भवति|
  अपि तु तेजोधातुरप्युदकान्तरिक्षधातुप्रायोऽवदातवर्णकरो भवति,
  पृथिवीवायुधातुप्रायः कृष्णवर्णकरः, समसर्वधातुप्रायःश्यामवर्णकरः||१७||

- Apart from the procedures mentioned above, *mahabhutas* also contribute in colour and complexion of skin. It is important to note that the *teja* (aura) associated with *apa* and *akasha mahabuta* are responsible for fair complexion, *prithvi* and *vayu* are responsible for black, and an equilibrium of all the five *mahabhutas* result in *shyamavarna* i.e. sky-like bluish complexion.

# Pumsavan Samskar:-

- तयोः कर्मणा वेदोक्तेन विवर्तनमुपदिश्यते प्राग्व्यक्तीभावात् प्रयुक्तेन सम्यक्|
  कर्मणां हि देशकालसम्पदुपेतानां नियतमिष्टफलत्वं, तथेतरेषामितरत्वम्|
  तस्मादापन्नगर्भां स्त्रियमभिसमीक्ष्य प्राग्व्यक्तीभावाद्गर्भस्य पुंसवनमस्यै दद्यात्|
  गोष्ठे जातस्य न्यग्रोधस्य प्रागुत्तराभ्यां शाखाभ्यां शुङ्गे अनुपहते आदाय द्वाभ्यां धान्यमाषाभ्यां सम्पदुपेताभ्यां गौरसर्षपाभ्यां वा सह दध्नि प्रक्षिप्य पुष्येण पिबेत्, तथैवापराञ्जीवकर्षभकापामार्गसहचरकल्कांश्च युगपदेकैकशो यथेष्टं वाऽप्युपसंस्कृत्य पयसा, कुड्यकीटकं मत्स्यकं वोदकाञ्जलौ प्रक्षिप्य पुष्येण पिबेत्, तथा कनकमयान् राजतानायसांश्च पुरुषकानग्निवर्णानणुप्रमाणान् दध्नि पयस्युदकाञ्जलौ वा प्रक्षिप्य पिबेदनवशेषतः पुष्येण, पुष्येणैव च शालिपिष्टस्य पच्यमानस्योष्माणमुपाघ्राय तस्यैव च पिष्टस्योदकसंसृष्टस्य रसं देहल्यामुपनिधाय [२] दक्षिणे नासापुटे स्वयमासिञ्चेत् पिचुना|
  यच्चान्यदपि ब्राह्मणा ब्रूयुराप्ता वा स्त्रियः पुंसवनमिष्टं तच्चानुष्ठेयम्|
  इति पुंसवनानि||१९||

- This verse lays down procedures mentioned in Vedic scriptures that, if administered correctly, could change the sex of an off spring even before its birth. When applied in the best of places and time, these procedures bear the desired fruit invariably always. Therefore, after examining the woman who has conceived recently, before the signs of gestation become apparent, (the physicia n) should administer *pumsavana* (procedures to beget a healthy offspring) on her.
- On the day of the appearance of the auspicious *pushya nakshatra*, one should collect two fresh leaf-buds from a banyan tree (Ficus religiosa Linn), growing in a cow-pen (typically, an open ground or range where cows are kept), from its eastern or north ern side branches. Then those leaf-buds should be added to curd and blended with either two good grains of *masha* (Phaseolus radiatus Linn - black gram) or white mustard seeds, and then given to the expectant mother to drink. Or, she may be given milk t o drink that has been processed with the paste of *jivaka, rishabhaka, apamarga* (Achyranthes aspera Linn), and *saireyaka* (synonym of *Sahachara*–Barleria cristata Linn) -either all mixed into a paste together or separately, as required. Or else she should be given a handful of water with *kudyakitaka* (a type of insect) or *matsyaka* (a type of small fish) on the occasion of *pushyanakshatra*. Similarly, on the event of *pushya nakshatra*, she should drink handful of curd milk or water, without leaving any leftover, duly immersed with red hot miniature male statuettes made of gold, silver or and iron. Similarly, on the occasion of *pushya nakshatra*, she should be made to inhale the steam emanating from steaming dish of powdered *shali* rice (while it is being cooked) and she herself should daub into her right nostril, using a cotton swab, drops of water from that same cooking pot, by placing (her h ead) on the *daheli* (door-sill).
- In addition to these rituals, any other measures suggested by *brahmanas* or well versed (experienced and well-favoring) women as *pumsavana*, should also be applied.
- **This concludes the verse on *pumsavana*.**

# Garbha Sthapana Drvya….

- अत ऊर्ध्वं गर्भस्थापनानि व्याख्यास्यामः
  ऐन्द्री ब्राह्मी शतवीर्या सहस्रवीर्याऽमोघाऽव्यथा शिवाऽरिष्टा वाट्यपुष्पीविष्वक्सेनकान्ता
  चेत्यासामोषधीनां शिरसा दक्षिणेन वा पाणिना धारणं, एताभिश्चैव सिद्धस्य पयसः सर्पिषो वा
  पानम्,एताभिश्चैव पुष्ये पुष्ये स्नानं,. सदा च ताः [१] समालभेत|
  तथा सर्वासां जीवनीयोक्तानामोषधीनां सदोपयोगस्तैस्तैरुपयोगविधिभिः|
  इति गर्भस्थापनानि व्याख्यातानि भवन्ति||२०||

- From this verse onwards, measures for the preservation of embryo (*garbha*) have been explained. Some of these rituals or practices require the pregnant woman to wear herbs, such as *aindri* (Citrulluscolocynthis Schrad – Gorakshakarkati), *brahmi* (Bacopamonnieri Pennel), *satavirya* (Cynodon doctylon Pers), *sahasravirya* (a variety of *durva* - cynodon species, also known as *durvadwaya*), *amogha* (*patala* – Stereospermumsuaveolens DC), *avyatha* (*guduchi* – Tinospora cordifolia Miers), *shiva*(*haritaki* – Terminaliachebula Linn), *arishta* (katukarohini – Piccrorhizakurroa Royle ex Benth), *vatyapushpi* (Pitabala – Sidacordifolia Linn), and *vishwaksenakanta* (*priyangu* – Callicarpa macrophylla Vahl.),on her head or her right hand. Or she may drink milk or ghee processed with the above mentioned herbs, or bathe at every occasion of *pushyanakshatra* with water boiled using these herbs, and she should keep these herbs readily available always. Similarly, the regular use of all of the *jivaniya* class of herbs (life promoter group of herbs) in the (above) prescribed manner is also beneficial. Thus, the procedures for stabilization of embryo (*garbha*) have been described in this verse.

# Factors affecting normal development of Garbha

- गर्भोपघातकरास्त्विमे भावा भवन्ति; तद्यथा उत्कटविषमकठिनासनसेविन्या [१] वातमूत्रपुरीषवेगानुपरुन्धत्यादारुणानुचितव्यायामसेविन्यास्तीक्ष्णोष्णातिमात्रसेविन्याः प्रमितोशनसेविन्या गर्भो म्रियतेऽन्तः कुक्षेः, अकाले वा स्रंसते,शोषी वा भवति; तथाऽभिघातप्रपीडनैः श्वभ्रकूपप्रपातदेशावलोकनैर्वाऽभीक्ष्णं मातुः प्रपतत्यकालेगर्भः,तथाऽतिमात्रसङ्क्षोभिभिर्यानैर्यानेन, अप्रियातिमात्रश्रवणैर्वा|
|

# Conti….

- प्रततोत्तानशायिन्याः पुनर्गर्भस्य नाभ्याश्रया नाडी कण्ठमनुवेष्टयति, विवृतशायिनी नक्तञ्चारिणी चोन्मत्तं जनयति,अपस्मारिणं पुनः कलिकलहशीला, व्यवायशीला दुर्वपुषमह्रीकं स्त्रैणं वा, शोकनित्या भीतमपचितमल्पायुषं वा, अभिध्यात्री परोपतापिनमीर्ष्युं स्त्रैणं वा, स्तेना त्वायासबहुलमतिद्रोहिणमकर्मशीलं वा, अमर्षिणी चण्डमौपधिकमसूयकं वा स्वप्ननित्यातन्द्रालुमबुधमल्पाग्निं वा, मद्यनित्या पिपासालुमल्पस्मृतिमनवस्थितचित्तं वा, गोधामांसप्राया शार्करिणमश्मरिणंशनैर्मेहिणं वा, वराहमांसप्राया रक्ताक्षं क्रथनमतिपरुषरोमाणं वा,

# Conti....

- मत्स्यमांसनित्या चिरनिमेषं स्तब्धाक्षं वा, मधुरनित्याप्रमेहिणं मूकमतिस्थूलं वा, अम्लनित्या रक्तपित्तिनं त्वगक्षिरोगिणं वा, लवणनित्या शीघ्रवलीपलितं खालित्यरोगिणं वा,कटुकनित्या दुर्बलमल्पशुक्रमनपत्यं वा, तिक्तनित्या शोषिणमबलमनुपचितं वा, कषायनित्या श्यावमानाहिनमुदावर्तिनं वा,यदयच्च यस्य यस्य व्याधेर्निदानमुक्तं तत्तदासेवमानाऽन्तर्वत्नी तन्निमित्तविकारबहुलमपत्यं जनयति

# Conti…

- पितृजास्तु शुक्रदोषा मातृजैरपचारैर्व्याख्याताः| इति गर्भोपघातकरा भावा भवन्त्युक्ताः [४] | तस्मादहितानाहारविहारान् प्रजासम्पदमिच्छन्ती स्त्री विशेषेण वर्जयेत्| साध्वाचारा चात्मानमुपचरेद्धिताभ्यामाहारविहाराभ्यामिति||२१||

# Treatment of Garbhini….

- व्याधींश्चास्या मृदुमधुरशिशिरसुखसुकुमारप्रायैरौषधाहारोपचारैरुपचरेत्, न चास्या वमनविरेचनशिरोविरेचनानि प्रयोजयेत्, नरक्तमवसेचयेत्, सर्वकालं च नास्थापनमनुवासनं वा कुर्यादन्यत्रात्ययिकाद्व्याधेः|
  अष्टमं मासमुपादाय वमनादिसाध्येषु पुनर्विकारेष्वात्ययिकेषु मृदुभिर्वमनादिभिस्तदर्थकारिभिर्वोपचारः स्यात्|
  पूर्णमिव तैलपात्रमसङ्क्षोभयताऽन्तर्वत्नीभवत्युपचर्या||२२||

- Any ailment or disease afflicting a pregnant woman should be treated very delicately, by means of medicaments and diet that are mainly soft, palatable, cooling, pleasant and mild. She should not be subjected to emetics, purgatives, or *nasya* (errhines), or to practices such as bloodletting. She should not be, at any time, administered corrective and unctuous enema, except in very serious emergency situations. In her final trimester, the pregnant woman, if in emergency conditions wherein emesis is urgently required, should only be treated by means of very mild emetics etc., or by its substitutes. A pregnant woman should be handled like a pot brimful of oil, which can spill on irritation i.e., very delicately.

# Prevention of Garbhsrava…..

- सा चेच्चतुष्प्रभृतिषु मासेषुक्रोधशोकासूयेर्ष्याभयत्रासव्यवायव्यायामसङ्क्षोभसन्धारणविषमाशनशयनस्थानक्षुत्पिपासातियोगात् कदाहारादवा पुष्पंपश्येत्, तस्या गर्भस्थापनविधिमुपदेक्ष्यामः| पुष्पदर्शनादेवैनां ब्रूयात्- शयने तावन्मृदुसुखशिशिरास्तरणसंस्तीर्णमीषदवनतशिरस्कं प्रतिपदयस्वेति| ततो यष्टीमधुकसर्पिर्भ्यां परमशिशिरवारिणी संस्थिताभ्यां पिचुमाप्लाव्योपस्थसमीपे स्थापयेत्तस्याः, तथाशतधौतसहस्रधौताभ्यां सर्पिर्भ्यामधोनाभेः सर्वतः प्रदिह्यात्, सर्वतश्च गव्येन चैनां पयसा सुशीतेन मधुकाम्बुना वान्यग्रोधादिकषायेण वा परिषेचयेदधो नाभेः, उदकं वा सुशीतमवगाहयेत्, क्षीरिणां कषायद्रुमाणां च स्वरसपरिपीतानि चेलानि [२]ग्राहयेत्, न्यग्रोधादिशुङ्गासिदधयोर्वाक्षीरसर्पिषोः पिचुं ग्राहयेत्, अतश्चैवाक्षमात्रं प्राशयेत्, प्राशयेदवा केवलं क्षीरसर्पिः,पद्मोत्पलकुमुदकिञ्जल्कांश्चास्यै समधुशर्करान् लेहार्थं दद्यात्, शृङ्गाटकपुष्करबीजकशेरुकान् भक्षणार्थं,गन्धप्रियङ्ग्वसितोत्पलशालूकोदुम्बरशलाटुन्यग्रोधशुङ्गानि वा पाययेदेनामाजेन पयसा, पयसा चैनांबलातिबलाशालिषष्टिकेक्षुमूलकाकोलीशृतेन समधुशर्करं रक्तशालीनामोदनं मृदुसुरभिशीतलं भोजयेत्,लावकपिञ्जलककुरङ्गशम्बरशशहरिणैणकालपुच्छकरसेन वा घृतसुसंस्कृतेन सुखशिशिरोपवातदेशस्थां भोजयेत्,क्रोधशोकायासव्यवायव्यायामेभ्यश्चाभिरक्षेत्, सौम्याभिश्चैनां कथाभिर्मनोनुकूलाभिरुपासीत; तथाऽस्या गर्भस्तिष्ठति||२४||

# Upavishtaka…

- यस्याः पुनरुष्णतीक्ष्णोपयोगाद्गर्भिण्या महति सञ्जातसारे गर्भे पुष्पदर्शनं स्यादन्यो वा योनिस्रावस्तस्या गर्भो वृद्धिं नप्राप्नोति निःस्रुतत्वात्; स कालमवतिष्ठतेऽतिमात्रं, तमुपविष्टकमित्याचक्षते केचित्|

# Naagodara……..

- उपवासव्रतकर्मपरायाः पुनः कदाहारायाः स्नेहद्वेषिण्या वातप्रकोपणोक्तान्यासेवमानाया गर्भो वृद्धिं न प्राप्नोतिपरिशुष्कत्वात्; स चापि कालमवतिष्ठतेऽतिमात्रम् , अस्पन्दनश्च भवति, तं तु नागोदरमित्याचक्षते||२६||

# Specific Therapeutic courses for the management of Intrauterine Growth Retardation

- नार्योस्तयोरुभयोरपि चिकित्सितविशेषमुपदेक्ष्यामः- भौतिकजीवनीयबृंहणीयमधुरवातहरसिद्धानां सर्पिषां पयसामामगर्भाणांचोपयोगो गर्भवृद्धिकरः; तथा सम्भोजनमेतैरेव सिद्धैश्च घृतादिभिः सुभिक्षायाः, अभीक्ष्णंयानवाहनापमार्जनावजृम्भणैरुपपादनमिति||

# Udavarta in Garbhini

- यस्याः पुनरुदावर्तविबन्धः स्यादष्टमे मासे न चानुवासनसाध्यं मन्येत ततस्तस्यास्तदविकारप्रशमनमुपकल्पयेन्निरूहम्|
  उदावर्तो ह्युपेक्षितः सहसा सगर्भां गर्भिणीं गर्भमथवाऽतिपातयेत्|

- तत्र वीरणशालिषष्टिककुशकाशेक्षुवालिकावेतसपरिव्याधमूलानां भूतीकानन्ताकाश्मर्यपरूषकमधुकमृद्वीकानां चपयसाऽर्धोदकेनोदगमय्य रसे प्रियालबिभीतकमज्जतिलकल्कसम्प्रयुक्तमीषल्लवणमनत्युष्णं च निरूहं दद्यात्|
  व्यपगतविबन्धां चैनां सुखसलिलपरिषिक्ताङ्गीं स्थैर्यकरमविदाहिनमाहारं भुक्तवतीं सायं मधुरकसिद्धेन तैलेनानुवासयेत्|
  न्युब्जां त्वेनामास्थापनानुवासनाभ्यामुपचरेत्||२९||

# Symptoms of intra-uterine death

- यस्याः पुनरतिमात्रदोषोपचयाद्वा तीक्ष्णोष्णातिमात्रसेवनाद्वा वातमूत्रपुरीषवेगविधारणैर्वा विषमाश(स)नशयनस्थानसम्पीडनाभिघातैर्वा क्रोधशोकेर्ष्याभयत्रासादिभिर्वा साहसैर्वाऽपरैः कर्मभिरन्तःकुक्षेर्गर्भो [१] म्रियते, तस्याःस्तिमितं स्तब्धमुदरमाततं शीतमश्मान्तर्गतमिव भवत्यस्पन्दनो गर्भः, शूलमधिकमुपजायते, न चाव्यः प्रादुर्भवन्ति, योनिर्नप्रस्रवति, अक्षिणी चास्याः स्रस्ते भवतः, ताम्यति, व्यथते, भ्रमते, श्वसिति, अरतिबहुला च भवति, न चास्या वेगप्रादुर्भावोयथावदुपलभ्यते; इत्येवंलक्षणां स्त्रियं मृतगर्भेयमिति विद्यात्||३०||

# Treatment of intra-uterine death

- तस्य गर्भशल्यस्य जरायुप्रपातनं कर्म संशमनमित्याहुरेके, मन्त्रादिकमथर्ववेदविहितमित्येके, परिदृष्टकर्मणा शल्यहर्त्राहरणमित्येके| व्यपगतगर्भशल्यां तु स्त्रियमामगर्भां सुरासीध्वरिष्टमधुमदिरासवानामन्यतममग्रे सामर्थ्यतःपाययेद्गर्भकोष्ठशुद्ध्यर्थमर्तिविस्मरणार्थं प्रहर्षणार्थं च, अतः परं सम्प्रीणनैर्बलानुरक्षिभिरस्नेहसम्प्रयुक्तैर्यवाग्वादिभिर्वा तत्कालयोगिभिराहारैरुपचरेद्दोषधातुक्लेदविशोषणमात्रं कालम्| अतः परं स्नेहपानैर्बस्तिभिराहारविधिभिश्च दीपनीयजीवनीयबृंहणीयमधुरवातहरसमाख्यातैरुपचरेत्| परिपक्वगर्भशल्यायाः पुनर्विमुक्तगर्भशल्यायास्तदहरेव स्नेहोपचारः स्यात्||३१||

# To be continued…….

thanks